श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

चोलसिंहपुरं दोड्डयाचार्य कृतं

# ॥ श्री देवराजपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री देवराजपञ्चकम् ॥

प्रत्यूषे वरदः प्रसन्नवदनः प्राप्ताभिमुख्यान् जनान्
आबद्धाञ्जलिमस्तकानविरलानाबालमानन्दयन्।
मन्दोड्डायितचामरो मणिमयश्वेतातपत्रश्शनैः
अन्तर्गोपुरमाविरास भगवानारूढपक्षीश्वरः॥ 1 ॥

मुक्तातपत्रयुगलोभयचामरान्तः
विद्योतमानविनतातनयाधिरूढम्।
भक्ताभयप्रदकराम्बुजमम्बुजाक्षं
नित्यं नमामि वरदं रमणीयवेषम्॥ 2 ॥

केचित्तत्वविशोधने पशुपतौ पारम्यमाहुः परे
व्याजह्रुः कमलासने नयविदामन्ये हरौ सादरम्।
इत्येवं चलचेतसां करधृतां पादारविन्दं हरेः
तत्त्वं दर्शयतीव संप्रति नृणां तार्क्ष्यः श्रुतीनां निधिः॥ 3 ॥

यद्वेदमौलिगणवेद्यमवेद्यमन्यैः यद्ब्रह्मरुद्रसुरनायकमौलिवन्द्यम्।
तत्पद्मनाभपदपद्ममिदं मनुष्यैः सेव्यं भवद्भिरिति दर्शयतीव तार्क्ष्यः॥ 4 ॥

प्रत्यग्गोपुरसंमुखे दिनमुखे पक्षीन्द्रसंवाहितं
नृत्यच्चामरकोकरं निरुपमच्छत्रद्वयीभासुरम्।
सानन्दं द्विजमण्डलं विदधतं सन्नाहचिह्नारवैः
कान्तं पुण्यकृतो भजन्ति वरदं काञ्च्यां तृतीयोत्सवे॥ 5 ॥

॥ इति श्री देवराजपञ्चकं समाप्तम् ॥